Reading Sanskrit

Worksheet

with Devanāgarī Exercises for Lessons 1-9

Lesson One

EXERCISES

C. Below is a list of proper names of beings and locations which will be introduced in future lessons. Practice pronouncing these words.

माया	गौतम	मार	मगध
कोशल	सुभूति	उपालि	राहुल
वाराणसी	मृगदाव	यशोधरा	राजगृह
अमिताभ	आनन्द	लुम्बिनी	बिम्बिसार
शक्र	अजातशत्रु	मैत्रेय	शारिपुत्र
श्रावस्ती	मञ्जुश्री	महाकाश्यप	अवलोकितेश्वर
अक्षोभ्य	मौद्गल्यायन	शुद्धोदन	सिद्धार्थ

Lesson Two

EXERCISES

C. Translate the following sentences into English. When translating a verb in the dual number, you may add the word "two" in parentheses for the sake of precision, e.g., *tatra vasataḥ* "They (two) live there."

> Develop the habit of reading sentences out loud before translating them. Use the recordings to check your pronunciation.

१. वदन्ति।

२. कुत्र तिष्ठति?

३. अत्र वसामि।

४. न स्मरावः।

५. पृच्छसि, न तु स्मरामि।

६. वदामि वा वदसि वा।

७. पृच्छथ, वदति च।

८. न च स्मरति, न च पृच्छति।

९. तत्र गच्छामः, तत्र हि वसामः।

१०. एवम् वदथ, न तु चिन्तयथ।

If you are studying with a teacher, try to give your answers and translations in the classroom without looking at your notes; use this portion of the class as an opportunity to exercise your memory and begin to develop a feeling for the language by remaining engaged with the text, rather than reading the translation prepared beforehand.

D. Translate the following sentences into Sanskrit.

1. "I am speaking."

2. "He is standing here."

3. "Where are they going?"

4. "I am not going there."

5. "He doesn't speak because he doesn't remember."

6. “Where do you (dual) live?”

7. “They stand there, but we stand here.”

8. “Either you (singular) go or I go.”

9. “He remembers and speaks in this way.”

10. “They reflect but they do not speak.”

Lesson Three

EXERCISES

C. Translate the following verbs, parse them using the abbreviations learned in this lesson, and identify the root and stem, e.g., *paśyāmaḥ* → "we see," pres. 1st pl. of √*dṛś* (stem *paśya*).

१. तिष्ठति →

२. नयतः →

३. भवथ →

४. पश्यामि →

५. स्मरन्ति →

६. गच्छन्ति →

७. चिन्तयामि →

८. पृच्छथः →

९. जयसि →

१०. वसावः →

D. Translate the following sentences into English.

१. आचार्यः शिष्यम् वदति।

२. बुद्धः श्रमणान् नयति।

३. श्रमणाः मोक्षम् गच्छन्ति।

४. अशोकः नरान् जयति।

५. नराः सिंहम् गजम् च पश्यन्ति।

६. बुद्धः तत्र वसति धर्मम् च वदति।

७. नृपः नरान् पृच्छति: मृगाः कुत्र वसन्ति इति।

८. अमात्यः एवम् वदति: नृपः भवसि, आचार्यः तु भवामि इति।

९. सिंहाः कुत्र वसन्ति इति न स्मरामः।

१०. आचार्यः शिष्यः च कुत्र गच्छतः इति नृपः चिन्तयति।

E. Translate the following sentences into Sanskrit.

When translating the contents of speech or thought from English to Sanskrit, remember to turn indirect speech constructions into direct speech (3.21), e.g., "The man says that he (himself) is the king" → *naraḥ vadati: nṛpaḥ bhavāmi iti* (lit. "The man says: 'I am the king.'"). Note that such a sentence could be translated a few other ways (3.20): *nṛpaḥ bhavāmi iti naraḥ vadati / naraḥ nṛpaḥ bhavāmi iti vadati*.

1. "The elephant sees the men."

2. "The renunciants go to the village and see the Buddha."

3. "The two brahmins are speaking to the warrior."

4. "The king asks the ministers where the Buddha is going."

5. “They say that he is going to the village.”

6. “The renunciant thinks that he (himself) is an Awakened One.”

7. “The disciples go to the village, but they do not dwell there.”

8. “The men do not go there, for they see a lion.”

9. “The student looks at the men and reflects (use *evam*): ‘Where is the king?’”

10. “The Buddha tells (√*vad*) the Saṅgha: ‘The Dharma is the teacher.’”

Lesson Four

EXERCISES

C. Transliterate the following words into Roman script (IAST), then parse them, e.g., नरौ → *narau*, du. nom./acc./voc. of *nara* m.

१. मृगाः ２. वदामि ३. मोहाय ४. जयति ५. कुलानि

६. गृहात् ७. गौतमेन ८. दुःखम् ९. देवैः १०. वनेषु

D. Transliterate the following words into Devanāgarī, then parse them.

1. *nayati* →

2. *vadāmi* →

3. *gajaḥ* →

4. *bāla* →

5. *phaleṣu* →

6. *sukhāya* →

7. *devāt* →

8. *naraiḥ* →

9. *nṛpau* →

10. *saṃsāre* →

E. Translate the following sentences into English.

१. धर्मः दुःखात् नरम् रक्षति।

२. अशोकः नाम नृपः भवने वसति।

३. बालाः आचार्येन सह वने चरन्ति पुष्पानि च पश्यन्ति।

४. श्रावकः क्लेशान् त्यजति चित्तम् च रक्षति।

५. श्रमणः भवनम् गच्छति। नृपस्य च कुलाय धर्मम् वदति।

६. रागस्य निरोधः सुखम् भवति इति श्रमणाः पश्यन्ति।

७. मोहात् द्वेषः भवति, द्वेषात् च दुःखम् भवति।

८. रत्नानि रक्षति नृपः, चित्तम् तु रक्षति श्रमणः।

९. बुद्धाः धर्मम् वदन्ति सुखाय देवानाम् मनुष्यानाम् च।

१०. देव बुद्धः श्रावकानाम् सङ्घेन सह वने वसति इति अमात्यः वदति।

F. Translate the following sentences into Sanskrit.

1. "King Aśoka goes to the city with warriors."

2. "The students live in the teacher's house."

3. "The teacher safeguards (√*rakṣ*) the students from troubles (*duḥkha*)."

4. "O brahmins, you do not speak the truth."

5. "The Buddha teaches the Dharma to ascetics and brahmins."

6. "I walk in the path of the Buddhas."

7. "Your Highness, an ocean of pain arises from hatred."

8. "Without Dharma, gods and men remain in *saṃsāra*."

9. "The disciples remember the appearance (in the world) of the Buddha named Gautama."

10. "*Nirvāṇa* arises from the cessation of the afflictions."

Lesson Five

EXERCISES

D. Transliterate the following words into Roman script. Some of the words in this and the following exercise will be introduced in future lessons.

१. आराम	२. उपासक	३. यशोधरा	४. देवी	५. उभय
६. दैव	७. अतः	८. एवम्	९. ओषधि	१०. इह

E. Transliterate the following words into Devanāgarī.

1. iva	2. api	3. bhīta	4. kumāra	5. ṛṣi
6. ādi	7. karuṇā	8. iti	9. upaniṣad	10. kupita

F. Translate the following sentences into English.

१. कुपितः नृपः भीतान् अमात्यान् पृच्छति: कुत्र कुमारः इति।

२. सुन्दरी माया देवी वने सुखम् चरति।

३. शुद्धोदनस्य सिद्धार्थः नाम धार्मिकः पुत्रः।

४. चित्तात् एव सुखानि च दुःखानि च भवन्ति।

५. शून्यानि एव संसारे सुखानि।

६. धर्मः कल्याणम् इव मित्रम् भवति। नरम् हि सुखम् एव नयति।

७. मैत्री सिंहेभ्यः श्रमणान् रक्षति।

८. रागः श्रमणस्य अपि चित्तम् न एव मुञ्चति।

९. अपि देवः असि इति नरः बुद्धम् पृच्छति।

१०. बोधिसत्त्वाः प्रज्ञया क्लेशान् जयन्ति। न तु निर्वाणम् इच्छन्ति।

G. Translate the following sentences into Sanskrit.

1. "We desire only the truth."

2. "The girls ask the teacher about Yaśodharā's story."

3. "The prince has beautiful (*kalyāṇa*) wives."

4. "A negligent king constantly dwells in the palace with beautiful (*sundara*) wives."

5. "The righteous prince easily and swiftly conquers the cities with the king's armies."

6. "*Saṃsāra* is like a deep river."

7. "The renunciant dwells in an empty house, but he does not become peaceful; even there he is heedless."

8. "In the scriptures (*sūtra*), the Buddha says that without virtuous friends, a renunciant does not reach release."

9. "The bodhisattvas say: 'We are the children of the Buddha, for we walk in the Bodhisattva's path.'"

10. "Disciples reach *nirvāṇa* through wisdom, but bodhisattvas remain in *saṃsāra* through (on account of) compassion.

Lesson Six

EXERCISES

B. Where necessary, correct the spelling of the following words by applying internal consonant *sandhi*.

१. धार्मिकेन २. रत्नानाम् ३. मनुष्येन ४. ब्रह्मन् ५. ब्राह्मनः

६. भिक्सूनाम् ७. ज्योतिसम् ८. नागार्जुनः ९. वृन्दम् १०. चक्सूंसि

D. Parse the following future tense verbs and identify the root. Some of these forms belong to roots which will be introduced in future lessons.

१. स्मरिष्यसि →

२. नेष्यामः →

३. चरिष्यामि →

४. त्यक्ष्यति →

५. लप्स्यामहे →

६. भाषिष्ये →

७. दास्यामि →

८. हनिष्यन्ति →

९. ज्ञास्यथ →

१०. आप्स्यावः →

E. Transliterate the following words into Roman script.

१. शून्यता	२. पुद्गल	३. स्वर्ग	४. ब्रह्मन्	५. श्वेत
६. पण्डित	७. अनुत्तर	८. सत्त्व	९. क्षान्ति	१०. विज्ञान

F. Transliterate the following words into Devanāgarī.

1. utpāda	2. manuṣya	3. sundara	4. bimbisāra	5. śīghra
6. āśrama	7. siddhārtha	8. vidyā	9. pramatta	10. vṛkṣa

G. Translate the following sentences into English. Use the English past tense to translate present tense verbs that describe actions done in the past (i.e., those belonging to the historical present).

Note: In addition to the single and double *daṇḍa* signs, modern Devanāgarī texts frequently use the em dash sign (—) in places where a colon would be used in Roman script, e.g., बालः वदति—तत्र गमिष्यामि इति (*bālaḥ vadati: tatra gamiṣyāmi iti* "The boy says: 'I will go there.'")

१. अथ मारः चिन्तयति स्म—कथम् बोधिसत्त्वम् जेष्यामि इति।

२. कामैः हरिष्यामि सिद्धार्थस्य चित्तम्।

३. शारिपुत्रः मौद्गल्यायनः च बुद्धम् सेवेते।

४. अर्थेन मित्राणि वर्धन्ते, विद्यायाः तु जायते अर्थः इति मन्यन्ते।

५. प्रज्ञाम् च करुणाम् च अपि सेवन्ते बोधिसत्त्वाः।

६. राजगृहम् गमिष्यामः, गौतमात् च श्रमणात् धर्मम् लप्स्यामहे।

७. आचार्यस्य विद्या अस्ति, सत्यम् तु न एव पश्यति।

८. नृपः बिम्बिसारः बोधिसत्त्वम् पृच्छति—कुमार कुतः एवम् वने वससि? कुत्र देवस्य मनुष्याः इति।

९. कामाः माया इव शून्याः भवन्ति इति भाषन्ते बुद्धाः।

१०. आश्रमम् गच्छति, श्रमणस्य च मार्गम् सेवते, दुःखस्य तु मूलम् न बुध्यते।

I. Translate the following sentences into Sanskrit. Use the Sanskrit present tense to translate past actions.

1. "The prince sat comfortably (*sukham*) in the tree's shade."

2. "I shall obtain knowledge from the teachers."

3. "Friends are born only from friendliness."

4. "You (sg.) remember the discourses, but when will you obtain release?"

5. "They drink the water of the rivers and delight in the fruits and roots of the forest."

6. "I do not delight in sensual pleasures, for they are not permanent."

7. "Only the joy of *nirvāṇa* is permanent."

8. "The students served the teacher as if he were a god."

9. "The minister said: 'How will you practice (*cariṣyasi*) Dharma without wealth?'"

10. "O minister, you do not understand the meaning of Dharma."

Lesson Seven

EXERCISES

B. Apply external consonant *sandhi* to the following words where necessary. Write your answers in Roman script and Devanāgarī following the conventions described in this chapter.

1. nagarāt gacchati
2. gajān aśvān ca
3. naram paśyati
4. gṛhāt āgacchati
5. rāgāt hi
6. bhavanāt tatra
7. vanāt nagaram
8. śiṣyān tatra

C. Guess the meaning of the following verbs.

१. √हन् "to strike" → प्रति√हन्

२. √धा "to place" → सम्√धा

३. √क्षिप् "to throw" → उद्√क्षिप्

४. √हन् "to strike" → नि√हन्

५. √वा "to blow" → निस्√वा

६. √पत् "to fall, fly" → उद्√पत्

७. √भ्रम् "to wander" → परि√भ्रम्

८. √इ "to go" → अनु√इ

९. √द्रु "to run" → वि√द्रु

१०. √हृ "to take, carry" → अप√हृ

D. Give the absolutive of the following verbs. None of these verbs add the extra vowel *-i-* when forming the absolutive; apply consonant *sandhi* changes wherever possible.

१. √भू "to be, become" →

२. अधि√गम् "to attain" →

३. वि√हृ "to dwell" →

४. √पच् "to cook" →

५. √नम् "to bow" →

६. √दुह् "to milk" →

७. सम्√श्रि "to resort to" →

८. √हन् "to strike" →

९. अभि√हन् "to strike" →

१०. √स्पृश् "to touch" →

E. Translate the following sentences into English.

Non-finite verb forms (including absolutives) bearing no particular idiomatic meaning are not listed separately in the vocabulary lists; only the root is provided, e.g., *pra√viś* for the absolutive *praviśya* in exercise two. The root in question will not be listed if it has already occurred in previous exercises, e.g., the root √*sev* for the absolutive *sevitvā* in exercise one. These can be found in the glossary at the end of this book.

१. धर्मं नित्यं सेवित्वा बोधिसत्त्वाः तुषिते उत्पद्यन्ते।

२. शान्तमाश्रमं प्रविश्य श्रमणैः सह विहरति।

३. ब्राह्मणाः वेदेषु एव सत्यमिति भाषित्वा अपगच्छन्ति स्म।

४. ब्राह्मणौ कुमारमुपगम्य भाषेते—देव कुतः आगच्छसि? कुत्र गच्छसि इति।

५. सूत्राणि पठित्वा अर्थं च अवगम्य धर्मे रमन्ते।

६. सन्ति एव लोके कल्याणाः पुरुषाः। रागं द्वेषं च जित्वा सुखं विहरन्ति।

७. कुतः शून्याः एव स्कन्धाः इति वदन्ति बुद्धाः ?

८. अथ देवी कथं कुमारं विना जीविष्यामि इति मन्यते।

९. स्वर्गस्य अपि सुखानि त्यक्त्वा लोकस्य सुखाय उत्पद्यन्ते लोके बुद्धाः।

१०. अथ बोधिसत्त्वः तुषिताच्च्युत्वा श्वेतः गजः भूत्वा मायायाः गर्भं प्रविशति स्म।

F. Translate the following sentences into Sanskrit. Apply all the *sandhi* rules learned up until now. Use absolutives to translate all prior actions.

1. "Seeing the king and the ministers, the men stood up."

2. "Having obtained knowledge, a man obtains wealth, and having obtained wealth, he delights in sensual pleasures."

3. "Brahmins say that the Vedas are eternal."

4. "Having overpowered the mind of a heedless person, the afflictions dwell there at ease."

5. "We sit (*ni√sad*) in the shade of the tree called Dharma."

6. "Upon witnessing (*√dṛś*) the suffering of the world, the prince became a renunciant (*pra√vraj*), and having become a renunciant, he attained *nirvāṇa*."

7. "Upon becoming a king or even a god, the Bodhisattva did not fall into (indulge in) sensual pleasures."

8. "Māra reflected: 'Once the Bodhisattva has overcome delusion, he shall teach the Dharma to the world.'"

9. "Having conquered the world with armies, you (sg.) shall obtain (*√labh*) only suffering."

10. "Protecting (*rakṣitvā*) the world through Dharma instead (*tu*), you shall rejoice (*raṃsyase*) both in the world and also in heaven."

Lesson Eight

SUBHĀṢITA

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।

न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥

EXERCISES

B. Apply vowel *sandhi* to the following words where necessary. Write your answers in Roman script and Devanāgarī.

1. vadāmi iti evam
2. narau atra
3. loke utpadyate
4. atra iti
5. kāmeṣu eva
6. mārge amātyaḥ
7. iva utpalam
8. devī āgacchati

C. Conjugate the following verbs in the present indicative for the person and number given. These verbs will be introduced in future lessons.

१. √तॄ 1P "to cross," 2nd sg. →

२. √शुष् 4P "to dry up," 3rd sg. →

३. √स्पृश् 6P "to touch," 1st pl. →

४. अव√लोक् 10P "to look," 3rd du. →

५. √घुष् 1P "to sound," 2nd pl. →

६. वि√द्रु 1P "to run away," 3rd pl. →

७. सम्√ऋध् 4P "to succeed," 3rd pl. →

८. √नम् 1P "to bow," 1st pl. →

९. प्र√अर्थ् 10Ā "to desire," 1st sg. →

१०. √वृत् 1Ā "to turn," 3rd pl. →

E. Translate the following sentences into English and rewrite them without *sandhi* (in their pre-*sandhi* form).

In the beginning, a common source of difficulty will be the identification of words not listed in the vocabulary lists, including pronouns or the indeclinable particles *na*, *ca*, *vā*, *tu*, *hi*, *iti*, *iva*, *api*, and *eva*, especially when they combine with each other or other words through vowel *sandhi*. For example, with the first sentence below: *prajñayā* (sg. instr. of *prajñā* f.) + *eva* → *prajñayâiva*.

१. दानाज्जायते पुण्यम्। प्रज्ञयैव तु शाम्यति दुःखम्।

२. बुद्धः श्रमणानुपगच्छति। तं च ते दृष्ट्वा गौतमः श्रमणः अत्रागच्छतीति वदन्ति स्म।

३. लोक उत्पद्यते बुद्धः ह्रद इवोत्पलम्।

४. ततः पुरुषः बुद्धमागम्य पादयोः पतित्वा बुद्धस्य शासने प्रव्रजामीति कथयति।

५. एतस्य लोकस्यानित्यतां बुद्ध्वा अतीव शान्ताः भवन्ति पण्डिताः पुरुषाः।

६. क्लेशाः चित्त उत्पद्य पुण्यान्यपहरन्तीति मत्वा श्रमणः चित्तं रक्षति।

७. अथ मारः सुन्दरीभिः कन्याभिः सह बोधिसत्त्वमुपगच्छति स्म।

८. अतीव गम्भीरं बुद्धानां ज्ञानम्। तच्चाधिगमिष्यामि लोकस्य हिताय सुखायार्थाय च।

९. ततः सः क्षत्रियः मनुष्याः खलु पुण्यस्य बलेन स्वर्गेषूत्पद्यन्त इति चिन्तयित्वा पापं त्यजति तस्मिंश्चार्ये धर्मे शिक्षते।

१०. बोधिसत्त्वाः पुद्गलस्य च धर्माणां च शून्यतां दृष्ट्वा संसारे ऽपि सुखं तिष्ठन्ति।

Lesson Nine

SUBHĀṢITA

आचार्यात् पादमादत्ते पादं शिष्यः स्वमेधया।

पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च॥

EXERCISES

B. Apply external *sandhi* to the following words where necessary. Write your answers in Roman script and Devanāgarī.

1. janāḥ evam	2. bālaḥ atra	3. hradaḥ iva	4. senābhiḥ ca
5. nṛpaḥ vadati	6. gajāḥ tu	7. nṛpaḥ katham	8. punar sevate

D. Identify the number and case of the following nominals. These stem types will be discussed in future lessons. They take the standard nominal endings in most of their declensions.

Observe the changes to the stem that occur due to internal *sandhi*, e.g., *manas* + *bhiḥ* → *man<u>o</u>bhiḥ* (cf. *naraḥ*/*naras gacchati* → *nar<u>o</u> gacchati*). Also note how certain stems take some form of vowel strengthening (*rājan* + *am* → *rāj<u>ā</u>nam*; cf. *sukhin* + *i* → *sukh<u>ī</u>ni*), or the insertion of a consonant before the standard ending (*ṛṣi* + *n* + *ām* → *ṛṣī<u>ṇ</u>ām*; cf. *senā* + *n* + *ām* = *senā<u>n</u>ām*).

१. भिक्षुभ्यः (भिक्षु m. "mendicant") →

२. ऋषीणाम् (ऋषि m. "seer") →

३. अर्हते (अर्हत् m. "Worthy One") →

४. पितरौ (पितृ m. "father") →

५. राजानम् (राजन् m. "king") →

६. कर्मभ्याम् (कर्मन् n. "action") →

७. मनोभिः (मनस् n. "mind") →

८. चक्षुषा (चक्षुस् n. "eye") →

९. सरिति (सरित् f. "river") →

१०. संपत्सु (संपद् f. "abundance") →

E. Conjugate the following verbs in the present indicative for the person and number given. Some of these verbs will be introduced in future lessons.

१. √हा 3P "to abandon," 1st sg. →

२. √भी 3P "to fear," 2nd sg. →

३. √भी 3P "to fear," 1st pl. →

४. √विद् 2P "to know," 3rd sg. →

५. √विद् 2P "to know," 3rd pl. →

६. √धा 3U "to place," 3rd pl. (P) →

७. √ब्रू 2U "to speak, say," 1st du. (P) →

९. √आस् 2Ā "to sit," 1st pl. →

८. आ√ख्या 2P "to tell; to call," 1st sg. →

१०. अव√इ 2P "to understand," 3rd sg. →

F. Translate the following sentences into English and rewrite them in Roman script without *sandhi*.

१. तासु पारमितासु शिक्षित्वा सत्त्वहिताय बुद्धो भविष्यामि।

२. पापादेव बिभ्यति पण्डिता जनाः।

३. हनिष्यामि मारं च मारसेनां च।

४. स्कन्धेषु पुद्गलं पश्यन्ति पृथग्जनाः, न तु कुशला योगिनः।

५. पारमिता एव कुलपुत्राः बोधिसत्त्वस्य कल्याणमित्राणि। पारमिता एव मार्गः।

६. ततो बोधिसत्त्व उद्यानं यास्यामीत्युक्त्वा भवनान्निर्गम्य मार्गे जीर्णं पश्यति स्म।

७. अथ शक्रो देवेन्द्रो देवान् कथयति स्म—अद्य भो बोधिसत्त्वः प्रव्रजिष्यतीति।

८. शून्यमिवाद्य नृपपुत्रेण विना शुद्धोदनस्य भवनमिति नगरजनो ब्रवीति।

९. मैत्र्यैव बोधिसत्त्वो मारसेनां जयति स्म, न बाणैः।

१०. अथ बोधिसत्त्वो नैतेन मार्गेण दुःखनिरोधो भवतीति मत्वा उत्थाय नद्यां स्नात्वा आहारमाहरति स्म।

Lesson Ten

SUBHĀṢITA

यथा काष्ठं च काष्ठं च समेयातां महोदधौ।

समेत्य च व्यपेयातां तद्वद्भूतसमागमः ॥

EXERCISES

C. Conjugate the following verbs in the imperfect tense for the person and number given.

1. √प्रच्छ् 6P "to ask," 3rd sg. →

2. √चिन्त् 10P "to think," 3rd pl. →

3. √भाष् 1Ā "to speak," 3rd pl. →

4. आ√ गम् 1P "to come," 1st pl. →

5. निस्√गम् 1P "to leave," 2nd pl. →

6. नि√सद् 1P "to sit down," 1st sg. →

7. √दा 3P "to give," 3rd sg. →

8. √ ब्रू 2U "to speak," 1st pl. (P) →

9. √ब्रू 2U "to speak," 3rd sg. (P) →

10. √शिक्ष् 1Ā "to train," 3rd sg. →

D. Conjugate the following verbs in the potential mood for the person and number given.

1. √जीव् 1P "to live," 3rd sg. →

2. √मन् 4Ā "to think," 3rd sg. →

3. अधि√गम् 1P "to attain," 1st pl. →

4. √भाष् 1Ā "to speak," 1st sg. →

5. उद्√पद् 4Ā "to arise," 3rd pl. →

6. √इ 2P "to go," 1st sg. →

7. √भी 3P "to fear," 3rd sg. →

8. √दा 3P "to give," 3rd sg. →

9. √या 2P "to go," 3rd pl. →

10. √हन् 2P "to kill," 3rd du. →

E. Translate the following sentences into English and rewrite them in Roman script without *sandhi*.

१. ततो देवी कुमारमेतदवदत्—यत्र देवो गमिष्यति, तत्रैव गमिष्यामीति।

२. यदा बोधिसत्त्वस्तुषिताच्च्युत्वा गर्भं प्राविशत्, तदा माया देवी स्वप्ने श्वेतं गजमप-
श्यत्।

३. बिम्बिसारो ऽमात्यानपृच्छत्—एष भिक्षुः कुत्र गच्छति? कुत्र वसतीति।

४. यथा न जलं विना पुष्पम्, तथा नूनं न वीर्यं विना सम्यक्सम्बोधिः।

५. आर्यश्रावको भिक्षवः शीले च समाधौ च प्रज्ञायां च सदा शिक्षेत।

६. अस्त्येवाग्निः। यदि ह्यग्निर्न स्यात्, तदा कथं धूमो भवेत्?

७. यदा बोधिसत्त्वो ऽजायत, तदा जनाः शान्तिं मुनीनामिवालभन्त।

८. यतो गृहपते शीलविशुद्धिश्चित्तशान्तिं ददाति, तत उपासको ऽपि पापं हित्वा शीलं रक्षेत् सदा। (*hitvā*, abs. of √*hā*)

९. अथ सिद्धार्थः सम्यक्सम्बोधिमभिसम्बुध्य एवमचिन्तयत्—वदेयं धर्मं न वा वदेयम्? गम्भीरः खल्वेषो ऽनुत्तरो धर्मः, अल्पाश्च लोके पण्डिता जना इति।

१०. यद्याहारविशुद्धेरेव ऋषयः पुण्यं लभेरन्, तदा मृगाणामपि बहु पुण्यं भवेत्।

Lesson Eleven

SUBHĀṢITA

न हि वैरेण वैराणि शाम्यन्तीह कदाचन।

क्षान्त्या वैराणि शाम्यन्ति एष धर्मः सनातनः॥

EXERCISES

B. Guess the meaning of the following *nañ-tatpuruṣa*-s.

1. ज्ञान n. "knowledge" → अ-ज्ञान n.
2. आर्य mfn. "noble" → अन्-आर्य mfn.
3. सत्य n. "truth" → अ-सत्य n.
4. मोघ mfn. "vain, fruitless" → अ-मोघ mfn.
5. शुचि mfn. "pure" → अ-शुचि mfn.
6. धर्म m. "righteousness" → अ-धर्म m.
7. लाभ m. "gain" → अ-लाभ m.
8. हित n. "benefit" → अ-हित n.
9. मन्द mfn. "slow, dull, weak" → अ-मन्द mfn.
10. एक mfn. "one" → अन्-एक mfn.

C. Translate the following sentences into English.

१. यदा कुमारः कंचिज्जीर्णमपश्यत्, तदापृच्छत्—सारथे क एष पुरुष इति।

२. चरिष्यामि कस्यापि श्रमणस्यान्तिके ब्रह्मचर्यम्।

३. एक उत्पद्यते जन्तुः, एक एव च म्रियते।

४. ये धर्मा हेतोः प्रभवन्ति तेषां हेतुं निरोधं च बुद्धो ऽवदत्।

५. अविद्यैव संसारे दुःखमूलम्। न कंचिदन्यं हेतुं पश्यामः।

६. यो द्वेषमेव हन्ति तस्य न कश्चिच्छत्रुरस्ति।

७. नृपो ऽब्रवीत्—भोः श्रमण क एष धर्मो यस्मिन् शिक्षसे? एतेन व्रतेन किं प्रार्थयस इति।

८. केचिद्धर्मं कथयन्ति शास्त्रेण, अन्ये काव्येन। उभयमेव तु पठन्ति बोधिसत्त्वाः। सर्वासु हि विद्यासु शिक्षन्ते सत्त्वहिताय।

९. स्वचित्तविशुद्धिः स्वर्गः प्रियाणि मित्राण्यर्थो ऽपि वा। यदिच्छति तत् सर्वं लभते दानात्। एवं दानस्य हितं विदित्वा को न दानानि दद्यात्? (*dadyāt*, pot. of √*dā*)

१०. यस्य बलेन परदुःखानि स्वदुःखानि च शाम्यन्ति न कदाचिदेव बोधिसत्त्व एतत् परं बोधिचित्तं त्यजेत्।

Beginning with this lesson, exercises will be followed by one or more readings from original Sanskrit texts. The notes provided to help you understand and translate these texts will typically only contain numbered references to grammar points belonging to previous lessons; make sure to review the current lesson before going over the readings (and exercises).

READING

The Means of Conquest (*Udānavarga*)

अक्रोधेन जयेत् क्रोधमसाधुं साधुना जयेत्।

जयेत् कदर्यं दानेन सत्येन त्वनृतं जयेत्॥

Lesson Twelve

SUBHĀṢITA

गीतैर्ह्रियन्ते हि मृगा वधाय

रूपार्थमग्नौ शलभाः पतन्ति।

मत्स्यो गिरत्यायसमामिषार्थी

तस्मादनर्थं विषयाः फलन्ति॥

EXERCISES

B. Conjugate the following verbs in the present indicative active for the person and number given.

1. √आप् 5P "to obtain," 2nd sg. →

2. √श्रु 5P "to hear," 3rd pl. →

3. √श्रु 5P "to hear," 1st sg. →

4. √ग्रह् 9U "to grasp," 2nd pl. (P) →

5. √ग्रह् 9U "to grasp," 1st sg. (P) →

6. √ज्ञा 9U "to know," 3rd du. (P) →

7. √ज्ञा 9U "to know," 2nd sg. (P) →

8. √भिद् 7U "to split," 3rd sg. (P) →

9. √भिद् 7U "to split," 1st du. (P) →

10. √कृ 8U "to do," 3rd pl. (P) →

C. Conjugate the following verbs in the tense/mood, voice, person, and number given.

1. √गम् 1P "to go," pot. act. 3rd pl. →

2. √अद् 2P "to eat," pres. pass. 3rd sg. →

3. √तृप् 4P "to be satisfied," pot. act. 3rd sg. →

4. √वृध् 1Ā "to grow, increase," ipf. act. 3rd pl. →

5. √शक् 5P "to be able," pot. act. 1st pl. →

6. √हा 3P "to abandon," pres. act. 3rd sg. →

7. √हा 3P "to abandon," pres. pass. 3rd sg. →

8. √त्यज् 1P "to abandon," ipf. pass. 3rd pl. →

9. √धृ 1P "to hold," pres. pass. 3rd sg. →

10. √दृश् 1P "to see," pot. pass. 3rd sg. →

D. Translate the following sentences into English.

१. न भावनया विना बोधिः प्राप्यते।

२. चित्तेन नीयते लोकः, चित्तेन परिकृष्यते।

३. कामेभ्यो जायते शोकः, धनेभ्यो जायते भयमिति जानन्ति पण्डिताः।

४. यत् खल्वार्येभ्यो मित्रेभ्यो वापि दीयते तदेव धनम्।

५. कदा द्रक्ष्यते भूयो लोके सम्यक्सम्बुद्धो लोकगुरुः ?

६. शमथमानन्द सेवित्वा विपश्यनामागम्य विमुच्यते।

७. यस्य कश्चिद्रागो द्वेषो वा न विद्यते तस्यान्तिके मार्गभावनायां प्रवर्तेत।

८. यदैव बालो ऽल्पामपि विद्यां प्राप्नोति तदैव पण्डितो ऽस्मीति मन्यते।

(*yadā eva* "as soon as")

९. येषु कामा न प्रवर्तन्ते भूयस्तान्यपि चित्तानि शान्तानां मुनीनामगृह्णात् सुन्दरी देवी। (*na bhūyas* "no more, no longer")

१०. तस्मिन् शुद्धोदनस्य राज्ये न कश्चित् कामायार्थमरक्षत्, न कश्चिदर्थाय धर्ममचरत्, नापि कश्चिद्धर्माय हिंसामकरोत्।

READING

Buddhism in a Nutshell (*Udānavarga*)

सर्वपापस्याकरणं कुशलस्योपसम्पदा।

स्वचित्तपर्यवदनमेतद्बुद्धस्य शासनम्॥

Lesson Thirteen

SUBHĀṢITA

भवन्ति नम्रास्तरवः फलोद्गमैर्

नवाम्बुभिर्दूरविलम्बिनो घनाः ।

अनुद्धताः सत्पुरुषाः समृद्धिभिः

स्वभाव एवैष परोपकारिणाम् ॥

EXERCISES

Translate the following sentences into English.

Note again that non-finite verb forms (including absolutives and participles) bearing no particular idiomatic meaning are not listed separately in the vocabulary lists. Exceptionally, primary derivatives formed with *-aka*, *-in*, or *-tṛ* (except for *śāstṛ*) and secondary derivatives formed with *-in* or *-vat*/*-mat* (except for *bhagavat*) are not listed in the vocabulary for this lesson.

१. नमन्ति फलिनो वृक्षाः, नमन्ति गुणिनो जनाः।

२. अथ भिक्षुसङ्घस्तेन नृपेण दत्तमारामं प्राविशत्। (*dattam*, pp. of √*dā*)

३. तस्मिन् समये कुमारो जराभिभूतं नरं पश्यति स्म।

४. एते कुदृष्टिपतिता बालपृथग्जनाः सर्वधर्माणां तत्त्वं न जानन्ति।

५. तं महासत्त्वं सदा वन्दे तत्त्वज्ञातारं संसारमोचकं शास्तारं देवानां मनुष्याणां च।

६. चित्तसमुद्भूतानि सर्वाणि दुःखानि भयानि चेत्युच्यते भगवता।

७. अथ नारीरामे दृष्ट्वा कुमारश्चिन्तयति स्म—कथमेवं यौवने रमन्ते? नूनं तां जरां सर्वापहारिणीं न पश्यन्ति। (*apahāriṇīm,* from *apa√hṛ*)

८. स शीलवान् नृपो न कदाचित् प्रियमसत्यमभाषत, नापि परुषं सत्यम्।

९. यस्मिन् समये बोधिसत्त्वो मातुर्गर्भे तिष्ठति, तस्मिन् समये न बोधिसत्त्वमाता कंचित् पापं स्वप्नं पश्यति स्म। (*yasmin samaye*, lit. "at which time," i.e., "as long as, while")

१०. चित्तमेव सदा स्मृत्या रक्षन्ति प्रज्ञावन्तः, नान्यत् किंचित्। यदा हि चित्तमेकं सु-रक्षितं, तदा सर्वाण्येव भयानि शाम्यन्ति।

READING

The Path to the Deathless (*Udānavarga*)

अप्रमादो ह्यमृतपदं प्रमादो मृत्युनः पदम्।

अप्रमत्ता न म्रियन्ते ये प्रमत्ताः सदा मृताः॥

Lesson Fourteen

SUBHĀṢITA

जयो वैरं प्रसवति दुःखं शेते पराजितः ।

उपशान्तः सुखं शेते हित्वा जयपराजयौ ॥

EXERCISES

Translate the following sentences into English.

Remember that pronouns (including 1st and 2nd person pronouns) are not listed in vocabulary lists. When you are unable to identify a word, keep in mind that it could be a pronoun and consult the declension tables on pages __ to identify it.

१. अथ कुमारो भृत्यमित्रैः सहोद्यानं निर्यातः ।

२. ततो बोधिसत्त्वो गङ्गामुत्तीर्य राजगृहमनुप्राप्तः । (*uttīrya*, abs. of *ud√tṝ*; cf. *tīryate*; 12.23)

३. धीराः कष्टमनुप्राप्ता न विषादिनो भवन्ति।

४. यथा वृष्टिः सुच्छन्नं गृहं न प्रविशति, एवं रागः सुभावितं चित्तं न प्रविशति।

(*succhannam*; cf. *vṛkṣasya cchāyāyām*; 7.4)

५. तथागतो ऽचिन्तयत्—यद्यहमेतं गम्भीरं धर्मं देशयेयम्, लोको न जानीयादिति। एवं चिन्तयित्वा धर्मं नादेशयत्।

६. ऋषिः शुद्धोदनमेवं कथयति—नृप पुत्रदर्शनाय वयमत्रागताः। (*darśanāya*, lit. "for the seeing," i.e., "to see"; 4.16)

७. शुद्धोदनः शोकाभिभूतो वनं दूतान् गमयति स्म।

८. मारः स्वान् पुत्रानामन्त्रयते स्म—कीदृशेन बलेन वयं बोधिसत्त्वं विजेष्याम इति।

९. सर्वं प्रार्थितं ददाति बोधिसत्त्वश्चिन्तामणिरिव।

१०. यस्मिन् समये बोधिसत्त्वो मातुर्गर्भान्निष्क्रान्तः, तस्मिन् समये स्थितैव सा क्षत्रियी क्षत्रियं प्रसूता। (*niṣkrāntaḥ*; 9.5)

READING

World Conqueror (*Bahudarśana*)

इन्द्रियं विजितं येन तेनैव भुवनं जितम्।

यश्चेन्द्रियैः पराभूतः स सर्वत्र पराजितः॥

Lesson Fifteen

SUBHĀṢITA

क्लेशप्रहारान् संरक्षेत् क्लेशांश्च प्रहरेद्दृढम्।

खड्गयुद्धमिवापन्नः शिक्षितेनारिणा सह॥

तत्र खड्गं यथा भ्रष्टं गृह्णीयात् सभयस्त्वरम्।

स्मृतिखड्गं तथा भ्रष्टं गृह्णीयान्नरकान् स्मरन्॥

EXERCISES

Translate the following sentences into English.

१. महाराज चक्रवर्ती राजा ते पुत्रो भविष्यति, अनुत्तरां वा सम्यक्सम्बोधिमभिसम्बुध्य धर्मचक्रं प्रवर्तयिष्यति।

२. अस्ति कर्म, अस्ति विपाकः, कारकस्तु नोपलभ्यते।

३. मायादेवी लुम्बिनीवने विचरन्ती पुष्पितमशोकवृक्षं पश्यति स्म।

४. प्रज्ञाशस्त्रेण क्लेशशत्रून् विजित्य निर्भयो विहरति योगी।

५. धर्मप्लवं लब्ध्वा सत्त्वा महान्तं संसारसमुद्रं तरन्ति। (*labdhvā*, abs. of √*labh*)

६. अविद्यामेव दुःखस्य मूलं देशयन्ति तथागताः।

७. अराडो बोधिसत्त्वमागच्छन्तं दृष्ट्वा स्वागतं स्वागतमित्युक्त्वा स्वमुटजमानीय वेल्लासन उपावेशयत्। (*uktvā*, abs. of √*vac*)

८. अथ बोधिसत्त्वः सर्वसत्त्वान् पश्यति स्म, च्यवमानान्, उपपद्यमानान्, सुगतिं गच्छतः, दुर्गतिं गच्छतः।

९. उदुम्बरपुष्पसुदुर्लभस्तथागतोत्पादः।

१०. नात्मदुःखेन तथा सन्तः संतप्यन्ते यथापकारिणां कुशलपक्षहान्या। (*na tathā ... yathā* ... "not so much ... as ...")

READINGS

1. The Only Companions in Death (*Sûktiratnahāra*)

अर्था गृहे निवर्तन्ते श्मशाने मित्रबान्धवाः ।

सुकृतं दुष्कृतं चैव गच्छन्तमनुगच्छति ॥

2. No Fate But What We Make (*Hitôpadeśa*)

पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते ।

तस्मात् पुरुषकारेण यत्नं कुर्यादतन्द्रितः ॥

3. Dharma and Nirvāṇa Defined (*Catuḥśataka*)

धर्मं समासतो ऽहिंसां वर्णयन्ति तथागताः ।

शून्यतामेव निर्वाणं केवलं तदिहोभयम् ॥

4. The Wise and the Fool (*Udānavarga*)

यो जानीयादहं बाल इति बालः स पण्डितः ।

बालः पण्डितमानी तु बाल एव निरुच्यते ॥

Lesson Sixteen

SUBHĀṢITA

मनःपूर्वङ्गमा धर्मा मनःश्रेष्ठा मनोजवाः ।

मनसा चेत् प्रदुष्टेन भाषते वा करोति वा ।

ततस्तं दुःखमन्वेति चक्रं वा वहतः पदम् ॥

मनःपूर्वङ्गमा धर्मा मनःश्रेष्ठा मनोजवाः ।

मनसा चेत् प्रसन्नेन भाषते वा करोति वा ।

ततस्तं सुखमन्वेति च्छाया वा ह्यनुगामिनी ॥

EXERCISES

Translate the following sentences into English.

Note that BVs *a-*/*nis-*/*vi-*X ("without X") and *sa-*X ("with X") that do not bear any kind of idiomatic meaning are not listed separately in the vocabulary lists.

१. भगवान् सश्रावकसङ्घो राजगृहे विहरति स्म।

२. अथ माया देवी राज्ञे तं स्वप्नं निवेदयति स्म—देव स्वप्ने किल ममाद्य हिमरजतः षड्दन्तो गजो गर्भं प्रविष्ट इति। (*praviṣṭaḥ*, pp. of *pra√viś*; 14.18)

३. कुमारो नारीभिः सुन्दरीभिः सेव्यमानो भवने स्थापितः शुद्धोदनेन।

४. आत्मदृष्टिमूलकाः सर्वक्लेशाः सूत्रेषूक्ताः।

५. अतृणे पतितो ऽग्निः स्वयमेवोपशाम्यति।

६. यो ऽसक्तचित्तो दानं ददाति तस्याप्रमेयं पुण्यम्।

७. चक्षू रूपाणि पश्यति, श्रोत्रं शब्दान् शृणोति, घ्राणं गन्धान् जिघ्रति, जिह्वा रसा-
नास्वादयति, कायः स्प्रष्टव्यानि स्पृशति, मनो धर्मान् विजानाति।

८. पञ्च स्कन्धास्तथागतेन लोक इत्याख्याताः।

९. न बोधिसत्त्वस्य व्यथाभवच्छरीरं ददतो ऽपि पूर्वजन्मसु। (*dadataḥ*, prap. of √*dā*; 15.11)

१०. कुमारस्य प्रदानविस्तरं श्रुत्वा योजनशतादर्थिन आगच्छन्ति। सर्वांश्च तान् कुमारः
परिपूर्णमनोरथान् प्रेषयति।

READINGS

1. A Word of Caution (*Mūlamadhyamakakārikā*)

विनाशयति दुर्दृष्टा शून्यता मन्दमेधसम्।

सर्पो यथा दुर्गृहीतो विद्या वा दुष्प्रसाधिता॥

2. The Calf of Past Actions (*Mahābhārata*)

यथा धेनुसहस्रेषु वत्सो विन्दति मातरम्।

तथा पूर्वकृतं कर्म कर्तारमनुगच्छति॥

3. What Goes Up (*Avadānaśataka*)

सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः।

संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम्॥

4. Where Gods Delight (*Manusmṛti*)

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।

यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः ॥

Lesson Seventeen

SUBHĀṢITA

देवेन प्रथमं जितो ऽसि शशभृल्लेखाभृतानन्तरं

बुद्धेनोद्धतबुद्धिना स्मर ततः कान्तेन पान्थेन मे।

त्यक्त्वा तान् बत हंसि मामतिकृशां बालामनाथां स्त्रियं

धिक् त्वां धिक् तव पौरुषं धिगुदयं धिक् कार्मुकं धिक् शरान्॥

EXERCISES

B. Translate the following sentences into English.

१. धर्मचारी सुखं शेते, इह परत्र च।

२. आशु वर्धते कुमारो हृदस्थमिव पङ्कजम्।

३. अथ केचिद्ब्राह्मणा वेदज्ञाः कुमारमभिगम्य एवमवदन्—जयतु भवान् क्षत्रिय-कुमार इति।

४. शमथ एकाग्रता चित्तस्य। विपश्यना भूतप्रत्यवेक्षा।

५. भगवान् भिक्षूनामन्त्रयते स्म—आतापिनो भिक्षवो विहरत। (*=ātāpino … bhavata*)

६. पश्यत भिक्षव एतौ द्वौ सत्पुरुषौ। एको मम सर्वश्रावकाणां प्रज्ञावतामग्रो भविष्यति, द्वितीय ऋद्धिमताम्।

७. ततो राजा कथयति—घुष्यन्तां नगरे घण्टाः। स्थविरस्यागमनं निवेद्यताम्।

८. सुचिरं तिष्ठेद्विधिवद्धृतो मृन्मयो घटः। कायस्तु सुधृतो ऽपि भिद्यते। (*suciram*; 5.9)

९. बोधिसत्त्वेन ते मुनयः पृष्टाः—यूयं किं प्रार्थयध्व इति? ... (*pṛṣṭāḥ*, pp. of √*prach*)

१०. एके कथयन्ति—वयं शक्रत्वं प्रार्थयामह इति। अपरे कथयन्ति—ब्रह्मत्वमिति। अन्ये कथयन्ति—मारत्वमिति।

READINGS

1. Names of the Buddha (*Amarakośa*)

सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः ।

समन्तभद्रो भगवान् मारजिल्लोकजिज्जिनः ॥

षडभिज्ञो दशबलो ऽद्वयवादी विनायकः ।

मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः ॥

स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः ।

गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः ॥

2. Like a Glob of Foam (*Prasannapadā*)

फेनपिण्डोपमं रूपं वेदना बुद्बुदोपमा ।

मरीचिसदृशी संज्ञा संस्काराः कदलीनिभाः ।

मायोपमं च विज्ञानमुक्तमादित्यबन्धुना ॥

3. This Ungrateful Body (*Nāgânanda*)

सर्वाशुचिनिधानस्य कृतघ्नस्य विनाशिनः ।

शरीरकस्यापि कृते मूढाः पापानि कुर्वते ॥

Lesson Eighteen

SUBHĀṢITA

क्षणं बालो भूत्वा क्षणमपि युवा कामरसिकः

क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः।

जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनुर्

नरः संसाराङ्के विशति यमधानीजवनिकाम्॥

EXERCISES

B. Translate the following sentences into English.

१. बोधिसत्त्वः षड्वर्षाणि दुष्करं चरिष्यति।

२. मित्रे शत्रौ च चित्तसमतामेव भावयेत्।

३. राज्ञाशोकेन भगवच्छासने श्रद्धा प्रतिलब्धा।

४. संसारपरिखेदो बोधिसत्त्वानां मारकर्म।

५. परदुःखमेव दुःखं साधूनाम्।

६. अयं शुद्धोदनो नरपतिरतीव सच्चरितेन महर्षीनप्यतिशेते।

७. सारथे शीघ्रं यानं योजय यत्राहमभिरुह्य उद्यानं निर्यास्यामि।

८. अनादिमति संसारे न कश्चित् सत्त्वो यो न मे शतशो बन्धुरभवत्।

९. अथ देवी धर्मश्रवणात् प्रीतमना दिव्यैः पुष्पैर्बोधिसत्त्वान् श्रावकांश्चावकिरति स्म।

(*prītamanāḥ*; 16.19)

१०. अल्पकास्ते महापृथिवीप्रदेशा यत्र जांबूनदमुत्पद्यते। एवमेवाल्पकास्ते सत्त्वा य इह शिक्षायां शिक्षन्ते, यदुत प्रज्ञापारमिताशिक्षायाम्।

READINGS

1. The Golden Rule (*Pañcatantra*)

श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।

आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥

2. Garuḍa and the Ant (*Subhāṣitâvalī*)

गच्छन् पिपीलको याति योजनानां शतान्यपि ।

अगच्छन् वैनतेयो ऽपि पदमेकं न गच्छति ॥

3. From Bug to Buddha (*Bodhicaryâvatāra*)

ते ऽप्यासन् दंशमशका मक्षिकाः कृमयस्तथा ।

यैरुत्साहवशात् प्राप्ता दुरापा बोधिरुत्तमा ॥

Lesson Nineteen

SUBHĀṢITA

कामक्रोधौ द्वयमपि पदं प्रत्यनीकं वशित्वे

हत्वानङ्गं किमिव हि रुषा साधितं त्र्यम्बकेण।

यस्तु क्षान्त्या शमयति शतं मन्मथाद्यानरातीन्

कल्याणं वो दिशतु स मुनिग्रामणीरर्कबन्धुः ॥

EXERCISES

Translate the following sentences into English.

१. अप्रमेया दोषा हन्तव्या मया।

२. द्वेषः प्रहातव्यः सुखार्थिभिः।

३. कथं भगवन् बोधिसत्त्वेन दानं दातव्यम्? कथं शीलं रक्षितव्यम्?

४. अस्मिन् प्रदेशे महाराज बोधिसत्त्वो जीर्णातुरमृतदर्शनोद्विग्नो वनं संश्रितः।

५. आचार्य तन्निर्दिशास्माकं यथा शून्यता विज्ञेया।

६. दुष्करशतसमुदानीतो ऽयमस्मदर्थं तेन भगवता सद्धर्मः। तस्मात् स सत्कृत्य श्रोतव्यः।

७. तस्मिन्नाश्रमपद आम्रवृक्षः फलभारावनतशाखस्तिष्ठति।

८. चक्षुःश्रोत्रादीन्द्रियाणि प्रतीत्य रूपशब्दादिविषयांश्च चक्षुःश्रोत्रादिविज्ञानानि प्रवर्तन्ते।

९. मनुष्यत्वमतिदुर्लभं कुशलाभ्यासयोग्यत्वं च कदा पुनः प्राप्स्यामि?

१०. अथ तस्य राज्ञः प्रदानौदार्यश्रवणाद्विस्मितप्रमुदितहृदया नानादिगभिलक्षितदेशनिवासिनः पुरुषास्तं देशमुपगताः।

READINGS

1. The Buddha's Paradoxical Nature (*Bodhisattvâvadānakalpalatā*)

चित्तं यस्य स्फटिकविमलं नैव गृह्णाति रागं

कारुण्यार्द्रे मनसि निखिलाः शोषिता येन दोषाः ।

अक्रोधेन स्वयमभिहतो येन संसारशत्रुः

सर्वज्ञो ऽसौ भवतु भवतां श्रेयसे निश्चलाय ॥

2. Like a Lotus, Like a Rock (*Nītiśataka*)

सम्पत्सु महतां चित्तं भवत्युत्पलकोमलम् ।

आपत्सु च महाशैलशिलासंघातकर्कशम् ॥

3. Against Procrastination (*Mahābhārata*)

श्वःकार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।

न हि प्रतीक्षते मृत्युः कृतं वास्य न वा कृतम् ॥

4. Untrustworthy (*Bodhicaryâvatāra*)

कृताकृतापरीक्षो ऽयं मृत्युर्विश्रम्भघातकः ।

स्वस्थास्वस्थैरविश्वास्य आकस्मिकमहाशनिः ॥

Lesson Twenty

SUBHĀṢITA

निर्दुर्जनान्यनुपभुक्तसरित्तरूणि

नानाविहंगविरुतानि मृगाकुलानि।

वैडूर्यकुट्टिममनोहरशाद्वलानि

क्रीडावनाधिकसुखानि तपोवनानि॥

EXERCISES

Translate the following sentences into English.

१. अथ भगवांस्तस्य जनकायस्य धर्मदेशनामकरोत्।

२. किमारम्भा बोधिसत्त्वानां चर्या, किमधिष्ठाना?

३. फलमदत्त्वा पूर्वकृतं कर्म न शाम्यति। (*a-dattvā*, abs. of √*dā*)

४. किं भगवंस्तथागतो ऽर्हन् सम्यक्सम्बुद्धो नित्य उताहो ऽनित्यः?

५. मायादेवी पुष्पितमशोकपादपमवलोक्य अवस्थिता प्रसवितुकामा। ...

६. शक्रो देवेन्द्रश्चिन्तयति—बोधिसत्त्वमाता ह्रीमती न शक्नोति महाजनकायपरिवृता प्रसवितुम्। उपायसंविधानं कर्तव्यमिति। ...

७. ततः शक्रेण तुमुलं वातवर्षं निर्मितम्, असौ च महाजनकायः समन्ताद्विद्रुतः।

८. यो ऽपि पारमितासु सर्वथा शिक्षितुमसमर्थः, तेनापि बोधिचित्तमुत्पादनीयमेव।

९. यथाङ्गुल्यग्रं न शक्यते स्प्रष्टुं तेनैवाङ्गुल्यग्रेण, तथा चित्तं नैव द्रष्टुं शक्यते तेनैव चित्तेन। (*spraṣṭum*, inf. of √*spṛś*; *draṣṭum*, inf. of √*dṛś*)

१०. अथ खलु तथागतः कृतकृत्यो निहतमारो दिव्यचक्षुषा सर्वं लोकमवलोक्य एवं चिन्तयति स्म—कस्मै प्रथमं धर्मं देशयेयम्?

READINGS

1. The Steadfastness of the Brave (*Nītiśataka*)

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु

लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम्।

अद्यैव वा मरणमस्तु युगान्तरे वा

न्याय्यात् पथः प्रविचलन्ति पदं न धीराः॥

2. The Case Against Anger (*Bodhicaryâvatāra*)

यदि स्वभावो बालानां परोपद्रवकारिता।

तेषु कोपो न युक्तो मे यथाग्नौ दहनात्मके॥

अथ दोषो ऽयमागन्तुः सत्त्वाः प्रकृतिपेशलाः।

तथाप्ययुक्तस्तत्कोपः कटुधूमे यथाम्बरे॥

मुख्यं दण्डादिकं हित्वा प्रेरके यदि कुप्यते।

द्वेषेण प्रेरितः सो ऽपि द्वेषे द्वेषो ऽस्तु मे वरम्॥

3. Instructions to a King (*Ratnâvalī*)

हितायैव त्वया चित्तमुन्नाम्यं सर्वदेहिनाम् ।

कारुण्यात् सततं राजंस्तीव्रपापकृतामपि ॥

तीव्रपापेषु हिंस्रेषु कृपा कार्या विशेषतः ।

त एव हि कृपापात्रं हतात्मानो महात्मनाम् ॥

Lesson Twenty-One

SUBHĀṢITA

वयमिह परितुष्टा वल्कलैस्त्वं दुकूलैः

सम इह परितोषो निर्विशेषो विशेषः ।

स तु भवति दरिद्रो यस्य तृष्णा विशाला

मनसि च परितुष्टे को ऽर्थवान् को दरिद्रः ॥

EXERCISES

Translate the following sentences into English.

१. तस्य गृहपतेः सम्पदः क्षीणतां याता ग्रीष्मकाल इव ह्रदाः ।

२. ततो राजा शुद्धोदनः सपरिवारः परं हर्षमुपागतः।

३. स शिष्यो वेदाध्ययनं कर्तुमारब्धः। तेन मेधाविनाल्पीयसा कालेन चत्वारो वेदा अधीताः।

४. श्रेष्ठं सर्वप्रदानेषु धर्मदानम्।

५. जात्यामसत्यां जरामरणं न भवति। जातिनिरोधाज्जरामरणनिरोधः।

६. दुःखात्मकं लोकमवेक्षमाणो ऽपि न खेदमायाति कृपालुः।

७. अत्ययमप्यनपेक्ष्य दित्सन्ति सत्पुरुषाः । (*an-apekṣya*, abs. of *apa√īkṣ*)

८. अकृते च पापे कृते च पुण्ये सतां च पुराणे धर्मे चरिते न बिभेति मृत्योः कदाचिदेव ।

९. यज्ञैस्तपोभिश्च स्वर्गं यियासन्ति रागवन्तः ।

१०. न विभवक्षयापेक्षया समृद्ध्याशया वा प्रदानवैधुर्यमुपयान्ति सत्पुरुषाः ।

READINGS

1. The Pursuit of Knowledge (*Śārṅgadharapaddhati*)

गते ऽपि वयसि ग्राह्या विद्या सर्वात्मना बुधैः ।

यद्यपि स्यान्न फलदा सुलभा सान्यजन्मनि ॥

2. False Knowledge (*Cāṇakyanīti*)

पुस्तकस्था च या विद्या परहस्ते च यद्धनम्।

कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम्॥

3. The Minds of the Great (*Uttararāmacarita*)

वज्रादपि कठोराणि मृदूनि कुसुमादपि।

लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति॥

Lesson Twenty-Two

SUBHĀṢITA

अन्धीकरोमि भुवनं बधिरीकरोमि

धीरं सचेतनमचेतनतां नयामि।

कृत्यं न पश्यति न येन हितं शृणोति

धीमानधीतमपि न प्रतिसंदधाति॥

EXERCISES

B. Translate the following sentences into English.

Exceptionally, verbs taking nominals as their prefix (22.29-30) are not listed in the vocabulary for this lesson's exercises and readings; the nominal and root are listed separately.

१. सप्तैर्दिनैः शास्तुर्जननी स्वर्गं ययौ।

२. संसारस्य मूलमजानन्तो जायन्ते सत्त्वाः पुनः पुनः। (*a-jānantaḥ*, prap. of √*jñā*; 15.11)

३. तत्याज बोधिसत्त्वस्तृणमिव देहं परार्थसंसिद्ध्यै।

४. श्रुतिमति प्रज्ञा प्रादुर्भवति। प्रज्ञावतः क्लेशाः प्रशाम्यन्ति।

५. सफलीकुर्यामिदं मानुषं जन्म सुदुर्लभम्।

६. भिक्षवो भगवन्तं पप्रच्छुः—कानि भदन्त तेन पुरुषेण पूर्वमन्यासु जातिषु कर्माणि कृतानि, येनाढ्ये राजकुले जात इति।

७. स्थविर उवाच—अयं महाराज स्थविरशारिपुत्रस्य स्तूपः। क्रियतामस्यार्चनमिति। राजाह—के तस्य गुणा बभूवुः? ...

८. स्थविर उवाच—स हि द्वितीयशास्ता धर्मसेनाधिपतिः प्रज्ञावतामग्रो निर्दिष्टो भगवता।

९. चित्ते विशुद्धे तदाश्रयाणि वाक्कायकर्माणि शुचीभवन्ति।

१०. आपदपि महात्मनामैश्वर्यसम्पद्वा सत्त्वेष्वनुकम्पां न शिथिलीकरोति।

READINGS

1. Misplaced Tolerance (*Bodhicaryâvatāra*)

हस्तपादादिरहितास्तृष्णाद्वेषादिशत्रवः ।

न शूरा न च ते प्राज्ञाः कथं दासीकृतो ऽस्मि तैः ॥

मच्चित्तावस्थिता एव घ्नन्ति मामेव सुस्थिताः ।

तत्रापाप्यहं न कुप्यामि धिगस्थानसहिष्णुताम् ॥

2. Man's Worst Enemy and Best Friend (*Nītiśataka*)

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः ।

नास्त्युद्यमसमो बन्धुः कुर्वाणो नावसीदति ॥

3. The Family of *Saṃsāra* (*Subhāṣitâvalī*)

मातापितृसहस्राणि पुत्रदारशतानि च।

युगे युगे व्यतीतानि कस्य ते कस्य वा वयम्॥

4. Māra's Trepidation (I) (*Buddhacarita*)

तस्मिन् विमोक्षाय कृतप्रतिज्ञे

राजर्षिवंशप्रभवे महर्षौ।

तत्रोपविष्टे प्रजहर्ष लोकस्

तत्रास सद्धर्मरिपुस्तु मारः॥१३.१॥

यं कामदेवं प्रवदन्ति लोके

चित्रायुधं पुष्पशरं तथैव।

कामप्रचाराधिपतिं तमेव

मोक्षद्विषं मारमुदाहरन्ति॥१३.२॥

तस्यात्मजा विभ्रमहर्षदर्पास्

तिस्रो ऽरतिप्रीतितृषश्च कन्याः ।

पप्रच्छुरेनं मनसो विकारं

स तांश्च ताश्चैव वचो बभाषे ॥ १३.३॥

5. Māra's Trepidation (II) (*Buddhacarita*)

असौ मुनिर्निश्चयवर्म बिभ्रत्

सत्त्वायुधं बुद्धिशरं विकृष्य ।

जिगीषुरास्ते विषयान् मदीयान्

तस्मादयं मे मनसो विषादः ॥ १३.४॥

यदि ह्यसौ मामभिभूय याति

लोकाय चाख्यात्यपवर्गमार्गम् ।

शून्यस्ततो ऽयं विषयो ममाद्य

वृत्ताच्च्युतस्येव विदेहभर्तुः ॥ १३.५॥

तद्यावदेवैष न लब्धचक्षुर्

मद्गोचरे तिष्ठति यावदेव।

यास्यामि तावद्व्रतमस्य भेत्तुं

सेतुं नदीवेग इवातिवृद्धः॥१३.६॥

ततो धनुः पुष्पमयं गृहीत्वा

शरान् जगन्मोहकरांश्च पञ्च।

सो ऽश्वत्थमूलं ससुतो ऽभ्यगच्छद्

अस्वास्थ्यकारी मनसः प्रजानाम्॥१३.७॥

Lesson Twenty-Three

SUBHĀṢITA

हीनः प्रार्थयते स्वसंततिगतं यैस्तैरुपायैः सुखं

मध्यो दुःखनिवृत्तिमेव न सुखं दुःखास्पदं तद्यतः ।

श्रेष्ठः प्रार्थयते स्वसंततिगतैर्दुःखैः परेषां सुखं

दुःखात्यन्तनिवृत्तिमेव च यतस्तद्दुःखदुःख्येव सः ॥

EXERCISES

Translate the following sentences into English.

१. राजा कुमाराय निवेदयामास—गच्छ कुमार, न ते मद्विषये वस्तव्यमिति । (*te*; 14.4)

२. राज्ञा शुद्धोदनेन नगरे घण्टावघोषणं कारितम्—सर्वशाक्यैः संनिपतितव्यमिति।

३. तस्य सम्यक्सम्बुद्धस्य मैत्रेय इति संज्ञा भविष्यति।

४. ये केचित् कुशला धर्माः सर्वे ते ऽप्रमादमूलकाः।

५. यद्यदेव कर्म करिष्यामि कल्याणं वा पापकं वा तस्यैव कर्मणो विपाकं प्रति-संवेदयिष्यामि।

६. क्लेशा मोक्षप्राप्तेरावरणमिति तेषु प्रहीणेषु मोक्षो ऽधिगम्यते।

७. स्वतन्त्रो भावो नास्तीति सिंहनादो ऽतुलो बुद्धानाम्।

८. यत् किंचित् कृतकं तत् सर्वमनित्यम्।

९. शीलवतामिहैवाभिप्रायाः कल्याणाः समृध्यन्ति, प्रागेव परत्रेति शीलविशुद्धौ प्रयतितव्यम्।

१०. भगवांस्त्रिभुवनहितकाम्यया दिव्यसुखमपि त्यक्त्वा दुष्करं कृतवानिति बुद्धे परः प्रसादः करणीयः।

READINGS

1. Two Kinds of Desire (*Bodhicaryâvatāra*)

ये केचिद्दुःखिता लोके सर्वे ते स्वसुखेच्छया।

ये केचित् सुखिता लोके सर्वे ते ऽन्यसुखेच्छया॥

2. The Lowly, the Average, and the Great (*Nītiśataka*)

प्रारभ्यते न खलु विघ्नभयेन नीचैः

प्रारभ्य विघ्नविहता विरमन्ति मध्याः।

विघ्नैः पुनः पुनरपि प्रतिहन्यमानाः

प्रारब्धमुत्तमजना न परित्यजन्ति॥

3. Māra's Assault (I) (*Buddhacarita*)

अथ प्रशान्तं मुनिमासनस्थं

पारं तितीर्षुं भवसागरस्य।

विषज्य सव्यं करमायुधाग्रे

क्रीडन् शरेणेदमुवाच मारः॥१३.८॥

उत्तिष्ठ भोः क्षत्रिय मृत्युभीत

चर स्वधर्मं त्यज मोक्षधर्मम्।

बाणैश्च यज्ञैश्च विनीय लोकं

लोकात् पदं प्राप्नुहि वासवस्य॥ १३.९॥

पन्था हि निर्यातुमयं यशस्यो

यो वाहितः पूर्वतमैर्नरेन्द्रैः।

जातस्य राजर्षिकुले विशाले

भैक्षाकमश्लाघ्यमिदं प्रपत्तुम्॥ १३.१०॥

...

4. Māra's Assault (II) (*Buddhacarita*)

इत्येवमुक्तो ऽपि यदा निरास्थो

नैवासनं शाक्यमुनिर्बिभेद।

शरं ततो ऽस्मै विससर्ज मारः

कन्याश्च कृत्वा पुरतः सुतांश्च॥ १३.१४॥

तस्मिंस्तु बाणे ऽपि स विप्रमुक्ते

चकार नास्थां न धृतेश्चचाल।

दृष्ट्वा तथैनं विषसाद मारश्

चिन्तापरीतश्च शनैर्जगाद॥१३.१५॥

शैलेन्द्रपुत्रीं प्रति येन विद्धो

देवो ऽपि शम्भुश्चलितो बभूव।

न चिन्तयत्येष तमेव बाणं

किं स्यादचित्तो न शरः स एषः॥१३.१६॥

Lesson Twenty-Four

SUBHĀṢITA

वलीभिर्मुखमाक्रान्तं पलितेनाङ्कितं शिरः।

गात्राणि शिथिलायन्ते तृष्णैका तरुणायते॥

READINGS

1. The Parable of the Ancient City (*Saṃyuktâgama*)

अधिगतो मे पौराणो मार्गः पौराणं वर्त्म पूर्वकैरृषिभिरनुयातम्। तद्यथा पुरुषो ऽरण्ये प्रवणे ऽन्वाहिण्डन्नधिगच्छेत् पौराणं मार्गं पौराणं वर्त्म पूर्वकैर्मनुष्यैरनुयातम्। स तमनुगच्छेत्। स तमनुगच्छन् स तत्र पश्येत् पौराणं नगरं पौराणीं राजधानीमारामसम्पन्नां वनसम्पन्नां पुष्करिणीसम्पन्नां शुभां दाववतीं रमणीयाम्। तस्यैवं स्यात्—यन्न्वहं गत्वा राज्ञ आरोचयेयम्। अथ स पुरुषो राज्ञ एवमारोचयेत्—यत् खलु देव जानीयाः, इहाहमद्राक्षमरण्ये प्रवणे

ऽन्वाहिण्डन् पौराणं मार्गं पौराणं वर्त्म पूर्वकैर्मनुष्यैरनुयातम्। सो ऽहं तमनुगतवान्। सो ऽहं तमनुगच्छन्नद्राक्षं पौराणं नगरं पौराणीं राजधानीं वनसम्पन्नां पुष्करिणीसम्पन्नां शुभां दाववतीं रमणीयाम्। तां देवो नगरीं मापयतु। अथ स राजा तां नगरीं मापयेत्। सा स्यादपरेण समयेन राजधानी ऋद्धा च स्फीता च क्षेमा च सुभिक्षा चाकीर्णबहुजनमनुष्या च।

एवमेव भिक्षव अधिगतो मे पौराणो मार्गः पौराणं वर्त्म पूर्वकैरृषिभिरनुयातम्। कतमश्च स पौराणो मार्गः पौराणं वर्त्म पूर्वकैरृषिभिरनुयातम्? यदुतार्याष्टाङ्गो मार्गः, तद्यथा सम्यग्दृष्टिः सम्यक्संकल्पः सम्यग्वाक् सम्यक्कर्मान्तः सम्यगाजीवः सम्यग्व्यायामः सम्यक्स्मृतिः सम्यक्स-माधिः। असौ भिक्षवः पौराणो मार्गः पौराणं वर्त्म पूर्वकैरृषिभिरनुयातम्। तमहमनुगतवान्। तमनुगच्छञ्जरामरणमद्राक्षम्, जरामरणसमुदयं जरामरणनिरोधं जरामरणनिरोधगामिनीं प्रतिपदमद्राक्षम्। ...। सो ऽहमिमान् धर्मान् स्वयमभिज्ञया साक्षीकृत्वा भिक्षूणामारोचयामि, भिक्षुणीनामुपासकानामुपासिकानां नानातीर्थ्यश्रमणब्राह्मणचरकपरिव्राजकानामारोचयामि।

2. The Practice of a Bodhisattva (*Vajracchedikā Prajñāpāramitā Sūtra*)

भाषिष्ये ऽहं ते यथा बोधिसत्त्वयानसंप्रस्थितेन स्थातव्यं यथा प्रतिपत्तव्यं यथा चित्तं प्रग्रहीतव्यम्। एवं भगवनित्यायुष्मान् सुभूतिर्भगवतः प्रत्यश्रौषीत्॥

भगवानस्यैतदवोचत्—इह सुभूते बोधिसत्त्वयानसंप्रस्थितेनैवं चित्तमुत्पादयितव्यम्—यावन्तः सत्त्वाः सत्त्वधातौ ... अण्डजा वा जरायुजा वा संस्वेदजा वौपपादुका वा रूपिणो वारूपिणो वा संज्ञिनो वासंज्ञिनो वा ... ते मया सर्वे ऽनुपधिशेषे निर्वाणधातौ परिनिर्वापयितव्याः। एवमपरिमाणानपि सत्त्वान् परिनिर्वाप्य न कश्चित् सत्त्वः परिनिर्वापितो भवति। तत् कस्य हेतोः? सचेत् सुभूते बोधिसत्त्वस्य सत्त्वसंज्ञा प्रवर्तेत, न स बोधिसत्त्व इति वक्तव्यः। तत् कस्य हेतोः? न स सुभूते बोधिसत्त्वो वक्तव्यो यस्य सत्त्वसंज्ञा प्रवर्तेत, जीवसंज्ञा वा पुद्गलसंज्ञा वा प्रवर्तेत॥

Lesson Twenty-Five

SUBHĀṢITA

धन्यैः शशाङ्ककरचन्दनशीतलेषु

रम्येषु हर्म्यविपुलेषु शिलातलेषु।

निःशब्दसौम्यवनमारुतवीज्यमानैश्

चंक्रम्यते परहिताय विचिन्त्यते च॥

EXERCISES

Translate the following sentences into English.

१. अग्निमान् पर्वतः, धूमवत्त्वात्।

२. स्कन्धा हेतुप्रत्ययसंभूतत्वादुत्पादस्थितिभङ्गलक्षणाः।

३. स्वप्नोपमत्वं सर्वधर्माणां भगवता प्रतिपादितम्।

४. दुर्विज्ञेयं प्रकृतिपरिशुद्धत्वं चित्तस्य। (*dur-vijñeyam*, fpp. of *vi√jñā*; 19.15)

५. शिष्यस्तीक्ष्णबुद्धितया शीघ्रं सर्वशास्त्राणां पारं गतः।

६. स्वचित्तमेव बाह्यरूपतया भ्रान्तं प्रतिभासते।

७. कदलीस्कन्धोपमो ऽयं कायो ऽसारकत्वात्। (*a-sāraka*; 16.11)

८. बालपृथग्जनो मोहाद्विषयान् सुखसाधनत्वेन गृह्णाति।

९. अनेककारणसाध्यत्वं कार्याणाम्।

१०. वैद्योपदेशमकुर्वाणस्य रोगिणः कुतो निरामयत्वम्? (*a-kurvāṇasya*, prmp. of √*kṛ*; 15.15)

READINGS

1. Māra Defeated (I) (*Bodhisattvâvadānakalpalatā*)

प्रतीपगमनात् तासामथ भग्नमनोरथः।

मन्मथः प्रथितारम्भः सैन्यसम्भारमाददे॥२५.५८॥

सर्वप्रहरणैर्व्याप्तं नानाप्राणिमुखैर्भयैः।

षट्त्रिंशत्कोटिविपुलं बलं तस्य समुद्ययौ॥२५.५९॥

स्वयमाकर्णनिष्कृष्टकोपक्रूरशरासनः ।

मारः स्फारविकारेण बोधिसत्त्वं समाद्रवत् ॥ २५.६०॥

शस्त्रवृष्टिस्तदुत्सृष्टा सह पांशुविषाश्मभिः ।

प्रययौ बोधिसत्त्वस्य मन्दाराम्बुजतुल्यताम् ॥ २५.६१॥

2. Māra Defeated (II) (*Bodhisattvâvadānakalpalatā*)

पुनर्मारबलोत्सृष्टा शस्त्रवृष्टिर्धृतक्षमे ।

चक्रिरे देवतास्तस्य वज्रप्रतिसमाश्रयम् ॥ २५.६२॥

स्मरो ऽपि नष्टसंकल्पः समाधेः श्रोत्रकण्टकम् ।

घण्टापटुरटत्पत्रं निर्ममे स्फटिकद्रुमम् ॥ २५.६३॥

तं तारमुखरं वृक्षं मारं च सबलायुधम् ।

चक्रवाटे समुत्क्षिप्य चिक्षिपुर्व्योमदेवताः ॥ २५.६४॥

भगवानथ संप्राप्तप्रसन्नज्ञाननिर्मलः ।

सर्ववित् सर्वगः सर्वजातिस्मृतिपरो ऽभवत् ॥ २५.६५॥

स तत्रानुत्तरज्ञानसम्यक्सम्बोधिमाश्रितः ।

ददर्श सर्वभूतानां गतिं कर्मोर्मिनिर्मिताम् ॥ २५.६६॥

Lesson Twenty-Six

SUBHĀṢITA

एतत् कवीन्द्रमुखचन्द्रमसः कदाचित्

काव्याभिधानममृतं यदि नागलिष्यत्।

संसारिणां विविधदुःखसहस्रभाजां

चेतोविनोदसदनं किमिहाभविष्यत्॥

READINGS

1. The Honey of Poetry (*Saundarananda*)

इत्येषा व्युपशान्तये न रतये मोक्षार्थगर्भा कृतिः

श्रोतॄणां ग्रहणार्थमन्यमनसां काव्योपचारात् कृता।

यन्मोक्षात् कृतमन्यदत्र हि मया तत् काव्यधर्मात् कृतं

पातुं तिक्तमिवौषधं मधुयुतं हृद्यं कथं स्यादिति॥

2. The Measure of Poetry (*Sûktimuktâvalī*)

असौ रसौचित्यगुणोज्ज्वलो ऽपि
    गुम्फो न काव्यव्यपदेशयोग्यः ।
धत्ते खलस्यापि न दुर्विषह्य-
    द्वेषग्रहोत्सारणमन्त्रतां यः ॥

3. Nothing Impossible (*Bodhicaryâvatāra Pañjikā*)

ते ऽप्यासन् दंशमशका मक्षिकाः कृमयस्तथा।

यैरुत्साहवशात् प्राप्ता दुरापा बोधिरुत्तमा ॥७.१८॥

ते ऽपि बुद्धा भगवन्तः पूर्वं शाक्यमुनिरत्नशिखिदीपंकरप्रभृतयः संसारसागरावर्तान्तर्गताः पृथग्जनावस्थायां परिभ्रमन्त एवंभूता ए**वासन्** बभूवुः**, यैरुत्साह**बलात् वीर्योत्कर्षसामर्थ्यात् सम्भारान् सम्भृत्य **प्राप्ता** अधिगता **दुरापा** दुर्लभप्रतिलम्भा **बोधिरुत्तमा** अनुत्तरा। आरब्ध-वीर्यस्य न किंचिद्दुष्करमिति भावः।

4. Nothing to Fear (*Bodhicaryâvatāra Pañjikā*)

पुण्येन कायः सुखितः पाण्डित्येन मनः सुखि।

तिष्ठन् परार्थं संसारे कृपालुः केन खिद्यते ॥७.२८॥

सुखं जातमस्य कायस्येति **सुखितः**। सुखं विद्यते ऽस्य मनस इति **सुखि**। एवमुभयसुखस-मन्वागतत्वात् कृपावान् **परार्थं संसारे** संसरन् ... **केन खिद्यते**? खेदहेतोरभावान्न केनचि-दिति भावः। तत् किमिदमकारणभीरुतया वैमुख्यमुपादीयते?